# Gaṇapati Sūktam

[(1) RV S 8-81-1 to 9 (2) RV S 2-23-1 (3) RV S 10-112-9&10 (Śhṛṅgērī Pāṭhaḥa)]

ॐ आ तू न॑ , इन्द्र क्षु॒मन्त᳚ञ् चि॒त्रं ग्रा॒भं सं गृ॑भाय ।
म॒हा॒ह॒स्ती दक्षि॑णेन ॥ १ ॥

ॐ ā tū na , in’drak’ kṣhuman’tañ’ñ’
chit’raṅ’ grābhaṁ’ saṅ’ gṛbhāya ।
mahāhas’tī dak’ṣhiṇēna ॥ 1 ॥

वि॒द्मा हि त्वा᳚ तुविकू॒र्मिं तु॒विदे᳚ष्णं तु॒वीम॑घम् । तु॒वि॒मा॒त्रमवो᳚भिः ॥ २ ॥

vid’mā hit’ tvāā tuvikūr’min’
tuvidēēṣh’ṇan’ tuvīmagham ।
tuvimāt’ramavōōbhiḥi ॥ 2 ॥

न॒हि त्वा᳚ शूर दे॒वा न मर्ता᳚सो॒ दित्सन्᳚तम् । भी॒मं न गां वा॒रयन्᳚ते ॥ ३ ॥

nahit’ tvāā śhūra dēvā na mar’tāāsō dit’san’n’tam ।
bhīman’ na gāṁ’ vārayan’n’tē ॥ 3 ॥

ए॒तो॒न्विन्द्रं॒ स्तवा॒मेशा᳚नं॒ वस्वः॑ स्व॒राजम्᳚ । न राध॑सा मर्धिषन्नः ॥ ४ ॥

ētōn’vin’draṁ’ stavāmēśhāānaṁ’ vas’vas’ svarājam’m ।
na rādhasā mar’dhiṣhan’naḥa ॥ 4 ॥

प्रस्तो᳚ष॒दुप॑ गासिष॒च्छ्र॒वत्साम॑ गी॒यमा᳚नम् । अ॒भि राध॑सा जुगुरत् ॥ ५ ॥

pras’tōōṣhadupa
gāsiṣhat’chhravat’sāma gīyamāānam ।
abhi rādhasā jugurate ॥ 5 ॥

www.SaiVeda.net

आ नोँ भर दक्षिणेनाऽभि सव्येन प्रमृंश । इन्द्र मा नो वसोर्निर्भाँक् ॥६॥
ā nōō bhara dak'ṣhiṇēnā (a)bhi sav'yēnap' pramṛśha |
in'dra mā nō vasōr'nir'bhāāke || 6 ||

उपं क्रमस्वा भंर धृषता धृष्णो जनाँनाम् । अदाँशूष्टरस्य वेदः ॥७॥
upak' kramas'vā bhara dhṛṣhatā dhṛṣh'nō janāānām |
adāāśhūṣh'ṭaras'ya vēda-ḥa || 7 ||

इन्द्र य , उ नु ते , अस्ति वाजो विप्रेँभिः सनित्वः ।
अस्माभिः सु तं संनुहि ॥८॥
in'dra ya , u nu tē , as'ti vājō vip'rēēbhis' sanit'vaḥa |
as'mābhis' su taṁ' sanuhi || 8 ||

सद्योजुवंस्ते वाजाँ , अस्मभ्यँ विश्वश्चन्द्राः । वशैँश्च मक्षू जंरन्ते ॥९॥
sad'yōjuvas'tē vājāā ,
as'mabh'yaṁ'ṁ' viśh'vaśh'chan'n'drā-ḥa |
vaśhaiīśh'cha mak'ṣhū jaran'tē || 9 || (1)

गणानाँ त्वा गणपतिं हवामहे कविं कवीनामुपमश्रवस्तमम् ।
ज्येष्ठराजं ब्रम्हणां ब्रम्हणस्पत , आ नः शृण्वन्नूतिभिः सीद सादनम् ॥१०॥
gaṇānāān' tvā gaṇapatiṁ' havāmahē
kaviṅ' kavīnāmupamaśh'ravas'tamam |
jyēṣh'ṭha rājam' bram'haṇām' bram'haṇas'pata , ā
naśh' śhṛṇ'van'nūtibhis' sīda sādanam || 10 || (2)

नि षु सीँद गणपते गणेषु त्वामाँहुर्विप्रतमं कवीनाम् ।
न , ऋते त्वत्क्रियते किं चनारे महामर्कं मघवञ्चित्रमर्च ॥ ११ ॥

ni ṣhu sīīda gaṇapatē gaṇēṣhut'
tvāmāāhur'vip'ratamaṅ' kavīnām ।
na , ṛtēt' tvat'kriyatē kiñ' chanārē mahāmar'kam'
maghavañ'chit'ramar'cha ॥ 11 ॥

अभिख्या नोँ मघवन्नाधमानान्त्सखेँ बोधि वसुपते सखीँनाम् ।
रणँ कृधि रणकृत्सत्यशुष्माऽभक्ते चिदा भजा राये , अस्मान् ॥ १२ ॥

abhikh'yā nōō maghavan'nādhamānān'tsakhēē
bōdhi vasupatē sakhīīnām ।
raṇaṅ'ṅ' kṛdhi raṇakṛt'sat'yaśhuṣh'mā (a)bhak'tē
chidā bhajā rāyē , as'mā-ne ॥ 12 ॥ (3)

ॐ शान्तिः शान्तिः शान्तिः ॥
ॐ śhā-n'tiśh' śhā-n'tiśh' śhā-n'tiḥi ॥

www.Sai Veda.net

[(1) RV S 8-81-1 to 9 (2) RV S 2-23-1 (3) RV S 10-112-9&10 (Kāñchī Pāṭhaḥa)]

ॐ आ तू न॑ , इन्द्र क्षुमन्तं॑ चित्रं ग्राभं सं गृ॑भाय ।
महाहस्ती दक्षि॑णेन ॥ १ ॥

ॐ ā tū na- , in'drak' kṣhuman'tañ'ñ'
chit'raṅ' grābhaṁ' saṅ' gṛ-bhāya ।
mahāhas'tī dak'ṣhi-ṇēna ॥ 1 ॥

विद्मा हि त्वा॑ तुविकूर्मिं॑ तुविदे॑ष्णं तुवीम॑घम् । तुविमात्रमवो॑भिः ॥ २ ॥

vid'mā hit' tvāā tuvikūr'min'
tuvidēēṣh'ṇan' tuvīma-gham ।
tuvimāt'ramavōōbhiḥi ॥ 2 ॥

नहि त्वा॑ शूर देवा न मर्ता॑सो दित्सन्॑तम् । भीमं न गां वारयन्॑ते ॥ ३ ॥

nahit' tvāā śhūra dēvā na mar'tāāsō dit'san'n'tam ।
bhīman' na gāṁ' vārayan'n'tē ॥ 3 ॥

एतोन्विन्द्रं स्तवामेशा॑नं वस्वः॑ स्वराजम्॑ । न राध॑सा मर्धि॑षन्नः ॥ ४ ॥

ētōn'vin'draṁ' stavāmēśhāānaṁ' vas'vas' svarājam'm ।
na rādha-sā mar'dhiṣhan'naḥa ॥ 4 ॥

प्रस्तो॑षदुप॑ गासिषच्छ्रवत्साम॑ गीयमा॑नम् । अभि राध॑सा जुगुरत् ॥ ५ ॥

pras'stōōṣhadupa-
gāsiṣhat'chhravat'sāma- gīyamāānam ।
abhi rādha-sā jugurate ॥ 5 ॥

www.sanvedam.net

आ नोँ भर दक्षिंणेनाऽभि सव्येन प्रमृंश । इन्द्र मा नो वसोर्निर्भाँक् ॥६॥
ā nōō bhara dak'ṣhi-ṇēnā (a)bhi sav'yēnap' pramṛ-śha ।
in'dra mā nō vasōr'nir'bhāāke ॥ 6 ॥

उपं क्रमस्वा भंर धृषता धृंष्णो जनाँनाम् । अदाँशूष्टरस्य वेदः ॥७॥
upak' kramas'vā bha-ra dhṛṣhatā dhṛṣh' ṇō janāānām ।
adāāśhūṣh'ṭaras'ya vēda-ḥa ॥ 7 ॥

इन्द्र य , उ नु ते , अस्ति वाजो विप्रैँभिः सनित्वः ।
अस्माभिः सु तं संनुहि ॥८॥
in'dra ya , u nu tē , as'ti vājō vip'rēēbhis' sanit'vaḥa ।
as'mābhis' su taṁ' sa-nuhi ॥ 8 ॥

सद्योजुवंस्ते वाजाँ , अस्मभ्यँ विश्वश्चनंद्राः । वशैँश्च मक्षू जंरन्ते ॥९॥
sad'yōjuvas'tē vājāā ,
as'mabh'yaṁ'm' viśh'vaśh'chan'n'drā-ḥa ।
vaśhaiīśh'cha mak'ṣhū ja-ran'tē ॥ 9 ॥ (1)

गणानाँ त्वा गणपंतिं हवामहे कविं कंवीनामुंपमश्रंवस्तमम् ।
ज्येष्ठराजं ब्रम्हंणां ब्रम्हणस्पत , आ नः शृण्वन्नूतिभिः सीद सादंनम् ॥१०॥
gaṇānāān' tvā gaṇapa-tiṁ' havāmahē
kaviṅ' ka-vīnāmu-pamaśh'ra-vas'tamam ।
jyēēṣh'ṭha rājam' bram'ha-ṇām' bram'haṇas'pata , ā
naśh' śhṛṇ'van'nūtibhis' sīda sāda-nam ॥ 10 ॥ (2)

www.sanskritveda.net

नि षु सीद गणपते गणेषु त्वामाहुर्विप्रतमं कवीनाम् ।
न , ऋते त्वत्क्रियते किं चनारे महामर्कं मघवञ्चित्रमर्च ॥ ११ ॥

ni ṣhu sīīda gaṇapatē gaṇēṣhut’
tvāmāāhur’vip’ra-tamaṅ’ kavīnām ।
na , ṛtēt’ tvat’kri-yatē kiñ’ chanārē mahāmar’kam’
ma-ghavañ’chit’ramar’cha ॥ 11 ॥

अभिख्या नो मघवन्नाधमानान्त्सखे बोधि वसुपते सखीनाम् ।
रणं कृधि रणकृत्सत्यशुष्माऽभक्ते चिदा भजा राये , अस्मान् ॥ १२ ॥

abhikh’yā nōō maghavan’nādha-mānān’tsakhēē
bōdhi va-supatē sakhīīnām ।
raṇaṅ’ṅ’ kṛdhi raṇakṛt’sat’yaśhuṣh’mā (a)bhak’tē
chidā bha-jā rāyē , as’mā-ne ॥ 12 ॥ (3)

ॐ शान्तिः शान्तिः शान्तिः ॥
ॐ śhā-n’tiśh’ śhā-n’tiśh’ śhā-n’tiḥi ॥

www Sai Veda net